
# बाणभट्टकृतिषु लोक–शास्त्र–दर्शनम्

# BANABHATTAKRTISHU LOKA-SHASTRA- DARSHANAM

# ಬಾಣಭಟ್ಟಕೃತಿಷು ಲೋಕ–ಶಾಸ್ತ್ರ–ದರ್ಶನಮ್




सम्पादकाः

डा. नागेन्द्रः

डा. मञ्जुनाथभट्टः

डा. तिरुमल पि कुलकर्णी


Scanned by TapScanner

# BANABHATTAKRUTISHU LOKA-SHASTRA- DARSHANAM

Edited by
**Dr. Nagendra**
Asst. Professor, SKSVA College, Adichunchanagiri
Nagamangala Taluk, Mandya District, Karnataka - 571811

**Dr. Manjunath Bhat**
Asst. Professor, Sri Shreematha Sanskrit College
Ummachagi, Yellapura Taluk, Karvara District, Karnataka

**Dr. Tirumala P. Kulkarni**
Professor, Sri Poorna Prajna Vidyapeeta
Bangalore, Karnataka

Published by
**Likith Prakashana**
# 654/2, I Floor, I Main Road,
B.B. Garden Road, Fort Mohalla, Mysore - 570 004.

**ISBN : 978-81-940693-8-6**

**First Impression** : 2019
**Pages** : viii+ 344 =352
© : Author
Copies : 100
Price : ` 275/-
Book Size : demi 1/8
**D.T.P.** : Anukshana Creations
Mob: 8660867073
Susheelendra Goggi
Mob: 9964798748
**Cover Page Design** : Kiran
**Printed at** : Kamal Impressions, Mysuru

# ಪರಿವಿಡಿ


| ವಿಷಯ | ಲೇಖಕರು | ಪು.ಸಂ. |
| --- | --- | --- |
| 1. बाणो मे हृदये वसतु | डा. एम्. शिवकुमारस्वामी | 8 |
| 2. बाणभट्टकृतिषु लोकशास्त्रदर्शनम् | डा. लक्ष्मीनारायण भट्टः | 15 |
| 3. कादम्बर्याम् अलङ्कारसौन्दर्यपरामर्शः | आचार्य चक्रवर्तिरङ्गनाथन् | 31 |
| 4. बाणभट्टकृतिषु ज्यौतिषदर्शनम् | Dr. Ramakrishna Pejathaya | 40 |
| 5. कादम्बर्यां वर्णिता गुरुकुलव्यवस्था | डा. राघवेन्द्र भट्टः | 50 |
| 6. बाणभट्टकृतौ हर्षचरिते व्यसनविचारः | डा. वेंकटरमण हेगडे | 57 |
| 7. बाणस्तु साम्राट् कवीनामिह | प्रो. जि. आर्. अम्बलि | 65 |
| 8. बाणभट्टस्य काव्यवैविध्यम्-कादम्बरी | Dr. Veena H. N. | 69 |
| 9. कादम्बरीग्रन्थे शुकनासोपदेशवर्णनम् | डा. श्रीवेङ्कटनाथन् के. इ. | 74 |
| 10. शुकनासोपदेशस्यावश्यकता प्रभावश्च | विद्वान् रवीन्द्र गणपति कोमारः | 78 |
| 11. शुकनासोपदेशानुसारं लक्ष्म्याः माहात्म्यम्, इह लौकिकोपादेयत्वञ्च | डा. अनिलप्रतापगिरिः | 81 |
| 12. बाणस्य शास्त्रपुराणादिषु पाण्डित्यम् | Vidvan H. S. Prashanth Bhat | 92 |
| 13. बाणभट्टकृतिषु लोक-शास्त्र-दर्शनम् | विद्वान् अमरगोपाल गुञ्जे | 96 |
| 14. परिसङ्ख्यालङ्कारे बाणचमत्कृतिः | विद्वान् तिम्मण्णः आर् | 101 |
| 15. बाणभट्टस्य शुकनासोपदेशे राजनीतिः | विदुषी कविता भट्टः | 105 |
| 16. बाणभट्टकृतौ विचारविमर्षः | विद्वान् राजेश शास्त्री | 110 |
| 17. हर्षचरिते धर्मशास्त्रोपदेशः | विद्वान् नवीन भट्टः | 114 |
| 18. अथातः कादम्बरीजिज्ञासा | विद्वान् सि. आर्. प्रदीपसिंहाचार्यः | 117 |
| 19. **Bhatta Bana and his works** | Dr. S. Ramaratnam | 123 |
| 20. **A study of Select moral edicts in the prose Kadambari of Bana** | Dr. V. Girishachandra | 128 |

# बाणस्तु सम्राट् कवीनामिह

प्रो. जि. आर्. अम्बलि

विभागप्रमुखः, संस्कृतविभागः

एस् बि कला तथा के सि पि विज्ञानमहाविद्यालयः,

विजयपुर

महाकविर्बाणभोहि भगवत्याः सरस्वत्या वरपुत्र आसीत। एतदुपरिलक्षीसरस्वत्योरुभ्योरेवातिमहत्ती कृपा समभावेन विअमानासीत्। वागीश्वर्याः पुत्रस्य बाणभट्टस्य गद्यानुशीलनमेकं मानदण्डमभूत् यदद्यावधिः गद्यजीवितकारैर्नोलङ्घितम्।

भारतीयसमाजस्य विविधसोपानाण् संस्कृतेः अमृतस्वरुपिण्या रसधाराः, मानवजीवनस्य रसमयानुभूतयः, लोकचित्रणस्य विविधाः कृतयः प्रकृतेः परिवर्तिन्यो द्दश्यावलयः, विचारसरणीनां शतसहस्रकेलयः या बाणकविना सच्चित्रिताः ताः स्ववैभवात् अनुत्तरवैलक्ष्ण्यात् सुभारतीरसामृतपायिनां मनीषीणां हृदयान् मदयन्ति।

'बाणोच्छिष्टं जगत्सर्वम्' अस्यां उत्त्यां जगत् शब्देन 'काव्यजगत्' अथवा 'काव्यकल्पनामयं जगत्' इत्यस्य अवधारणा गृह्यते। 'काव्यम्' इत्येतत् सुदीर्घकाव्यपरम्परा वेदवेदाङ्गेतिहास (रामायणं महाभारतञ्च) पुराणपरम्पराया अवबोधनप्रायपदम्। कथं तर्हि बाणस्य पूर्वविद्यमानं काव्यजगत् उच्छिष्टमभूद् इत्येषा कल्पना दुर्गाह्या। किं पुनः, उत्तरवर्तिकाव्यजगत् संङ्ग्राह्यं ? एवमेव यदि भवेत् तर्हि 'व्यासोच्छिष्टं जगत्सर्वम्' इत्येषा उक्तिरपि प्रसृता आसीत्। वस्तुतः तत्तु व्यासविरचित महाभारतमाधृत्यैव सुचिरविख्यातं जगति तले- सुविदितमेतद् विश्वज्ञानविज्ञानसम्बन्धिनी याद्दशी अनुभूतिः महाभारते संलक्ष्यते न ताद्दशी अन्यत्रैकत्रावलोक्यते। विश्वकोशोऽयं ग्रन्थः इतिहासभूगोल-समाज-धर्मनीतिदर्शनादिनिखिलविषयाणाम्। बाणस्य प्राक् आदिकर्वाल्मीकिकालिदासाभ्यां



Scanned by TapScanner

उच्छिष्टा काव्यसम्पदपि वरिवर्ति। एवं समाधानीयम् यत् स्वकालोत्तरवर्तिभिः मानमेया इव सञ्जाता महाकविर्बाणस्य वाणी। बाणस्य परवर्तिकवीनां काव्यकल्पना न बाणम् अतिशयतेतराम्। अथवा तासु कल्पनासु किमपि नवीनं न यतो हि सा कल्पना सर्वाङ्गतया पूर्वमेवास्वादितोपवर्णिता कविवरेण बाणेन।

वस्तुतः बाणसम्बन्धे प्रकृतप्रशस्त्या एतदेव भावो यत् बाणस्य काव्ये कल्पनाया उत्तुङ्गसन्दर्भे, अनुभूतिवृत्तयोः विस्तिर्णो व्यासः पात्राणां वर्णनानाञ्च वैविध्यानुरूपः शब्दभाण्डारः, काव्यशैलि-विचारभङ्गिमा-रसालङ्काराणां प्रयोगः शोभतेतमाम्। काव्यक्षेत्रे यदभिष्टं, कल्पनाया या पराकाष्ठा, कवीनां समक्षे चित्राणां या पृष्ठभूमिः आकलिता तत्तद्विषयाणां नव्यभव्यप्रतिकृतिः बाणस्य काव्येषु दरीदृश्यते।

बाणभट्टस्य प्रतिभायाः, लोकोत्तराभिव्यञ्जनायाः चातुरी, साहित्यस्य प्रत्येकभङ्गिमायाः विच्छित्याः वा प्रस्तुतिः, रसालङ्काराणां मनोज्ञः सन्निवेशः, मानव मानवेतरपात्राणां संसृष्टिः अद्यावधिः कवीनां मार्गदर्शनं करोति। बणभट्टेन परिस्थितीनां गभीरं चित्रणमुपस्थापितं पुनश्च समाधानमपि तत्रैव सुघटितं विन्यस्तम्। कथावृत्तेन त्यागतपश्चर्याप्रेममैत्र्यादिभावानां हृदयहारिचित्रणमुद्घाटितं यज्जीवनम् आनन्दनीडमिव सुखवासयोग्यं भावयति।

बाणस्य कल्पनाशक्तिः, गभीरानुभूतिः, सम्वेदनशीलता, व्यापकदृष्टिः, प्रखरपाण्डित्यं, प्रभूतानुभवः, विशालशब्दभाण्डारः कुत आयातः कथमायातः? एतादृशान् प्रश्नान् उत्तरितुं बाणस्य जीवनवृत्तस्य स्तरा अन्वेषणीया आलोडनीयाः।

बाणास्य जन्म प्रख्यातवात्स्यायन (सारस्वत) वंशेभवत् तस्य गृहान्तरे शुकसारिका विशुद्धतया मन्त्रोच्चारणे प्रसक्ताः वेदाभ्यासपारायणबटुकान् स्वल्पाशुद्धोच्चारणे निरोधुं शक्या आसन्। बाणस्य पितृमहाभागः चित्रभानुः आ-उपसः-सूर्योदयपर्यन्तं द्विमूहुर्तं यावत् निरन्तरं होमक्रियासंलग्नः श्रमसीकरैः प्रोञ्छिताः बोभूयन्ते स्म। निषेकादिना बाणस्य संस्कारविशेषाः वैदिकविधिना सम्पादिताः। चतुर्दशवर्षायुषो बाणस्य पितुः दिवङ्गतपूर्वेण एव समावर्तनसंस्कारः सम्बभूव। पितुः निधनानन्तरं बाणः वेदवेदाङ्गपुराणादिशास्त्रज्ञानेन सह जीवनस्य प्रयोगशालायां पदार्पणं कृतवान्। जन्मना मेधावी (स्वभावगम्भीरधीः) बाणः कुतूहलवृत्या गृहान्निष्क्रान्तः असीमपारावरे जीवनसंसारेऽवतरितवान्। एवं गम्भीरधारणाशक्तिः ज्ञानौत्सुक्यं च आभ्यां द्वाभ्यां जन्मसिद्धगुणाभ्याम् आघटितं



Scanned by TapScanner

बाणस्य व्यक्तित्वम्। तस्मिन् व्यक्तित्वे तारल्यं पर्यटनशीलप्रवृत्तिरूपा एकोत्तरा विशेषता सञ्जाता। समुत्पन्ना अनुभवपरिणतिः। बहुदेशेषु अटन् बहुजनेषु विचरन् सङ्गृहीतवान् अनुभवसहस्राणि। देशान्तरदर्शनोत्कण्ठया गृहाअनिष्क्रतवान्। उच्चराजकुलोत्पन्नामुत्तमव्यवहारान्, सभ्याचारान् ददृशिवान्। गुरुकुलेषु विद्यापीठेषु स्वयमुषित्वा तत्रत्यानां विद्याग्राहिणां तपोमयजीवनम् अतिनैकट्येन स्वदितवान्। कथं निर्बाधविद्यासाधना विधीयते एतदनुभवमर्जितवान्। विदग्धजनाकीर्णगोष्ठीषु चारं चारं तेषां विचारप्रणालीं विविक्तवान् परन्तु न तत्र स्वात्मानं विस्मृतवान्। मित्रसहायस्य यात्रासहचारिणो बाणास्य द्वाचत्वारिंशत् मित्राणि नाम्नोल्लिखितानि। विविधशास्त्रज्ञानां विभिन्नकलानां विशारदानां विभिन्नवर्गस्य प्रतिनिधिभूतानां सान्निध्येनामण्डितं तस्य मित्रमण्डलम्। तत्तच्छास्त्रदर्शनधर्मकलादयः साक्षात्कृता आत्मसाक्षात्कृताश्च तेन। हर्षचरितस्य प्रारम्भे कविना संस्कृतप्राकृतकवीनां कृतयः प्रशस्ताः संस्कृतसाहित्यस्य विभिन्नविधेषु संविभक्ताः ग्रन्थाः बाणेन अवश्यमेव अधीता आस्वादिता वा।

प्रकृतिप्रेम्णाबद्धहृदयो बाणो वनोपवनाधित्यकोपत्यकासु उच्चावचशिखरेषु परिभ्रमणलालसया अन्यतरां विशेषतामापद्यत। चित्रग्राहिबुद्धिसंपन्नबाणस्य मनस्तले नवनवविधानां चित्राणां सूक्ष्मदर्शनेऽस्ति ननु अनुत्तरो विशेषः। समङ्कितानि पुनश्चैतान्येव चित्राणि तेन कविवरेण। स्वलेखनचातुर्या च स्वकृतिषु अवतार्योट्टङ्कितानि। बाणस्य व्यक्तित्वस्य चतुर्दिग्रूपा गम्भीरधारणशक्तिज्ञानौत्सुक्यपर्यटनशीलता-प्रकृतिप्रेमानुरूपा असाधारणी विशेषता तस्मै संस्कृतसाहित्ये विशिष्टस्थानमापादयति।

स्वभावतः राजप्रकृत्या वंशोचितविद्याप्रवृत्त्या साहित्यकलानुरागेन रसभरेण वैदग्ध्येन प्रागल्भ्यमधिकमासुं तरुणी वाणी बाणस्य बभूव। उक्तपृष्ठभूम्यां सम्वलितबाणस्य स्वान्तोनुभवप्रभविश्णोः कलोदधिस्नपयिष्णोः काव्यवीथ्यां प्रवेशेन जीवनसय विविधचित्राणि तस्य पाण्डित्यतूलिकया आबद्धा। अत एव सम्यगुक्तं "बाणोच्छिष्टं जगत्सर्वम्" इति।

बाणकाव्ये यद्वर्णनलालित्यम्, शिल्पविधानस्य सौन्दर्यम्, रसतूप्तकवि-हृदयस्यानुभूतिः, सत्यानुसन्धानदृस्य महती शक्तिश्चैतत्सर्वमद्वितीयम्।

बाणस्य काव्यसञ्चिकायां विभिन्नवर्गीयपात्राणितेषां रुचयो मतयो मनोवृत्तयः परिस्थितयः समङ्किताः सञ्जाताः। प्रकृतेः सुरुचिपूर्णं सौख्यावर्जकं

चित्रणं भयावहनीयपशुपक्षिणां शुकसारिकासमसम्भृतपक्षिणां, मुनिकुमारावलिहन्तीनां मृगीणां वर्णनं, तपोवनाश्रमाणां वर्णनं, यज्ञाग्नीनां समुत्थितस्वर्गसोपानपङ्क्तिवन्धूमलेखानां साक्षाद्दर्शनं, मन्त्रसिद्धशास्त्रपरिचर्चानिरतमुनीनूआं चित्रणं कथं न जगन्मनोहरति। कादम्बर्यामुज्जयिनिविदिशास्थाण्वीश्वर

प्रभृतिनां सुनियोजितराजधानीनां, राजगृहाणांम्, चाकचिक्यकारिणाम्, आस्थानमण्डपानाम् अन्तःपुरीयविलसितानां, सौधशिखराणां, बाह्योद्यानभवनोद्यानानां, सार्वजनिकवास्तुस्थानां, सङ्गीतपानशालानां, चित्रभित्तीनां, देवमन्दिराणां, द्यूतशालापानगृहाणां, गजशालानां, राजकुञ्जराणां, राजगृहपालितपक्षिणां, विपणापणीनां, सरित्कूपप्रपासेतुनाजलघटि यन्त्राणां शब्दचित्राणि सर्वत्र चमत्कारवर्धकसहृदयजनहारिभिरलङ्कारैः ससुज्जितानि अङ्कितानि च रसनिर्भरैः वर्णनैः रुचिरस्वरवर्णपदैः रसभावती वाणी बाणो बभूव।

चन्द्रदेवकविना साभिप्रायेणोक्तम्-श्लेषे केचन शब्दगुम्फविषये केचिदलङ्कारे कतिचित्सदर्थविषये चाऽन्ये कथावर्णने।' तादृशैः उदाहरणैः चाऽलङ्कारे कतिचित्सदर्थविषये चाऽन्ये कथावर्णने।' तादृशैः उदाहरणै

वाक्कलाचकोरा इव चिन्वन्ति मनीषिणः बाणकाव्यस्य चन्द्रिकाम्। अत्रे काव्यसंसारे निमग्नोऽपि उद्धरन्ति प्रकटरसानुगुणविकटाऽक्षररचना चमत्कारि- सकलकविकुला बाणस्य वाचः'। बाणकविना प्रदत्तानि वर्णसहस्राणि सूक्ष्मतामाकलयन्ति। एतेषां वर्णनानां व्याजेन मर्मज्ञकवेः तूलिकया वेदवेदाङ्गेतिहास-ज्योतिष-मीमांसा-न्याय-धर्मशास्त्र-कामशास्त्रार्थशास्त्र-काव्यशास्त्र-विभिन्नकलाशास्त्राणि किञ्चान्यबहुसुसंघटितं सुसूक्ष्मतया सन्दर्शितम्। बाणस्य काव्येषु तस्य विलक्षणव्यञ्जनाशक्त्या अलङ्कृतशैल्या ज्ञानविज्ञानानामन्तर्भवोऽपि अङ्गभूतमिव संलक्ष्यते। जीवजगत्यां मनोभावनानां वृत्तीनां चाङ्कने अद्भुतकल्पनया काव्यस्य आत्मतत्वस्य रसस्योपलब्धिर्जायते। अस्य कवेः काव्येन सामान्यकामवासनामुल्लङ्घ्य अविचलप्रेमतत्वोपलब्धिः पुनः शिवतत्वोपल्ब्धिः सम्पद्यते। बाणं तु सर्वेश्वरमानतोस्मि' सूपपादितं सत्यं बाणोच्छिष्टं जगत्सर्वम्।